छन्दोमञ्जरी ।

वैद्यमहामहोपाध्याय—
श्रीमद्-गङ्गादास विरचिता ।

श्रीमद्-गुरुनाथविद्यानिधि-भट्टाचार्यकृत-
टीकानुवादप्रभृतिभि समलङ्कृता

कलिकाता निवेदिता लेनस्थित संस्कृतविद्यालयत
श्रीजानकीनाथ काव्यतीर्थेन
प्रकाशिता ।

१३३२ वङ्गाब्दे पुन संस्करणम् ।

मूल्यमेकोनपादरूप्यकम् ॥) ।

प्राप्तिस्थान—
छात्रपुस्तकालय
निवेदिता लेन, बागबाजार
कलिकाता।



Printed by
M. N. GHOSE
GHOSE PRESS
38 Sibnarayan Dass's La
CALCUTTA

निवेदनम्।

इह खलु साहित्यसंसारे छन्दोविद्या विशेषेण कवयितॄणामुपकारं साधयति, छन्दोविज्ञातारश्च अनायासेनैव शक्ता भवन्ति काव्यनिर्म्माणेष्विति किमधिकमत्र वक्तव्यम्। प्राचीनकाले सैतत्र काश्यप-कात्यायन-माण्डव्य-पिङ्गलप्रभृतिभिर्मुनिभिः बहुविधश्छन्दोग्रन्थो विनिर्म्मितः। तस्य छन्दोग्रन्थस्य पिङ्गलादिभेदेन बाहुल्येऽपि छन्दोमञ्जरीमेव विद्यार्थिनां परमोपयोगित्वेन अङ्गीकुर्व्वन्ति विपश्चितः। तथाह्यस्मिन् यत्र यादृशं छन्दः समुपक्रान्तं, तस्य लक्षणं तत्र तादृशेनैव छन्दसा निबद्धं, येन शिक्षार्थिना मनसानुशीलनाशुद्धबुद्धीनामपि मानसमुकुरे छन्दोग्रन्थमात्रशरणानां जनगणानामपर्य्यालोचयतामपि प्रतिफलति छन्दःस्वरूपप्रकाशः। तेनैव छन्दोमञ्जरीमिमां कवयो नितरां प्रशस्तां मन्यन्ते। इयञ्च राजकीयकार्य्योपाधिपरीक्षायामेव विशेषतः पाठ्यरूपेण निर्वाचिता विविधविद्यागौरवपरीक्षके कर्त्तृपक्षीये तत्र च परीक्षार्थिनामतिसरलतयापि प्रसिद्धा विषय परीक्षणीयतया समुपस्थापितो दुर्गमनामवलम्बन इति विज्ञातवन्तो वयमस्या ललिततमाया महद्ग्रन्थाया अपि नितरां सुगमतां मुद्रापयितुं स्वीकृतवन्तो यत्नविशेषम्। ग्रन्थस्यास्य निर्म्माता खलु वैद्यवंशजो गोपालदासात्मजः पण्डिताग्रगण्यो महामहोपाध्याय श्रीमद्गङ्गादासः। स हि अच्युतचरितं नाम महाकाव्यं गोपालशतकं, सूर्य्यशतकञ्च प्रणिनाय। अस्य इतोऽधिक परि

चय सुदुर्लभ । अस्मिन् ग्रन्थे आर्याराधनीयग्रन्थोक्तदर्शनात् तत्प्रणेतुर्गंगारिमिश्रस्याभ्यासीनोऽयं गंगादास इति निर्धारणं न दोषाय प्रभवति । छन्दसां प्राचीनत्व तत्प्रशस्तिश्च भूयसी समुप , पादितवन्तो यद अस्मत्प्रकाशिते पिङ्गलच्छन्दःसूत्र एव प्रचुरेति नात्र बाहुल्येन तद्विषयपर्यालोचना समीचीनतया प्रतिभाति । तथापि सङ्क्षेपतः किञ्चित् समालोच्यते । 'छन्दः पद्ये च वेदे च' इत्यमरवचनात् छन्दस पद्य नामान्तर पद्यमिति प्रतीयते । किन्तु अनयोर्भेदोऽपि समुपलभ्यते यथा—'छन्दोबद्धपद पद्यमिति । यत्तु गुप्तिच्छन्दःशास्त्रपारगतैः पण्डितैर्यदुच्यते—'लघुगुरुस्वरव्यञ्जनस्याविशेषश्छन्दः' इति तन्न असमीचीनम्, 'स्वरा अक्षरमणा स्पृहेलस्तदनुयायिन ' इति महाभाष्यप्रमाणात् । छन्दसो नियामका स्वरगणा व्यञ्जनानि तु तदनुयायीनीति तेषां हृदयम् । चतुर्दशसु विद्यासु छन्दःशास्त्रमेका विशिष्टा विद्या । यथा विष्णुपुराणे—'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तर । धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश ॥' वेदस्य षडङ्गानि यथा—“शिक्षा कल्पो व्याकरणं निरुक्तं छन्द इत्यपि । ज्योतिषामयनञ्चैव षडङ्गो वेद इष्यते ॥” दृश्यते पाणिनीयशिक्षाया—'छन्दः पादौ तु वेदस्य यथा पद्भ्यां विना मनुजस्य, तथा छन्दोऽन्तरेण वेदस्य अवस्था दुरवस्थैव भवति ।' छन्दोज्ञान सविशेष प्रयोजनीयम् । तथाच श्रुति—'यो ह वा अविदितार्षेयच्छन्दो दैवत ब्राह्मणेन मन्त्रेण याजयति वाध्यापयति, वा स्थाणू वच्छति गर्त्तं वा पद्यते प्रमीयते पापीयान् भवति ॥ (श्रा, ब्रा २१)

पाणिनीयशिक्षायामपि—'आर्षं छन्दश्च दैवत्यं विनियोग पुन. पुन । वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ॥ मन्त्रो हीन स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रु स्वरतोऽपराधात् ॥' "छादयन्ति एनम् पापात् कर्मण ।' इति श्रुति । 'छन्दांसि छादनात्' इति यास्केन लिखितम् । चन्दयति ह्लादयति इति छन्द, 'चन्देरादेश्च छ' इति पाणिनि । वेदे गद्य पद्य च उभयमेव दृश्यते । तत्र गायत्र्यादीनि सप्त च्छन्दांसि व्यवहृतानि । श्रीमता गङ्गादासेन 'छन्दोमञ्जर्यां केवलं लौकिकछन्दसां लक्षणानि प्रकटितानि, अत एवात्र वैदिकच्छन्दसामालोचनेनालम् । वैदिकछन्दोभ्य लौकिकछन्दसामाविर्भाव इत्यत्र नास्ति सन्देहावसर । संस्कृतभाषायां छन्दसो यथा सर्वाङ्गीणत्वं दृश्यते न तथान्यभाषासु । लोकेषु असंख्येषु छन्दःसु प्राचीनयुगे आदिकविना तमसातटवासिना वाल्मीकिना स्वप्रणीते आदिकाव्ये रामायणे त्रयोदश छन्दांसि अवतारितानि । ततो मुनिवरेण श्रीकृष्णद्वैपायनो वेदव्यासश्चाष्टादशभि छन्दोभि महाभारतं प्रणीतम् । अथ क्रमेण संस्कृतसाहित्येषु बहुना छन्दसा व्यवहारोऽजायत ।

आदिमसंस्कृतकाव्यात् रामायणादारभ्य माघसमयपर्यन्त क्रमश केन प्रकारेण छन्दसां आविर्भाव समपद्यत संस्कृत साहित्येषु तद्विज्ञानाय प्रख्यातयशसा महामहोपाध्यायेन पण्डित शिरोमणिना श्रीमता रामतारणशिरोमणिना विरचिता काचित् सूचिपत्री अत्र संनिवेश्यते ।

छन्दोमञ्जरी ।

प्रथमः स्तवकः

देवं प्रणम्य गोपालं वैद्यगोपालदासजः
सन्तोषातनयश्छन्दो गङ्गादासस्तनोत्यदः ॥१॥
सन्ति यद्यपि भूयांसश्छन्दोग्रन्था मनीषिणाम्
तथापि सारमाकृष्य नवकार्थो ममोद्यमः ॥२॥

नमो विघ्ननाशाय। ग्रन्थकर्त्ता ग्रन्थारम्भे निखिलविघ्नविघाताय अभीष्टदेवता प्रणामरूपमङ्गलाचरणपुरःसरं ग्रन्थप्रतिपाद्यं प्रतिपादयति—देवमिति। वैद्यः वैद्यवंशोत्पन्नः यो गोपालदासः तस्मात् जात इति वैद्यगोपालदासजः, वैद्यवंशगोपालदासस्य पुत्र इति यावत् सन्तोषाख्या रमणी तस्यास्तनयस्तद्गर्भसम्भूतः गङ्गादासः गङ्गादास-नामा कविः देवं अभीष्टदेवं गां पालयतीति गोपालस्तं श्रीकृष्णं प्रणम्य, अदः एतत् छन्दः छन्दसां परिचायकं शास्त्रं तनोति प्रथयति ॥ १ ॥

ननु पिङ्गलप्रभृतीनां पूर्व्वाचार्य्याणां बहव एव छन्दोग्रन्थाः वर्त्तन्ते, तत् किमिति तवायमारम्भः इत्याशङ्कामपनेतुमाह—सन्तीति। यद्यपि मनीषिणां पूर्व्वपण्डितानां पिङ्गलादीनां भूयांसः बहुतराश्छन्दोग्रन्थाः छन्दःशास्त्राणि सन्ति वर्त्तन्ते, तथापि तेषु

১। বৈদ্যবংশজ, গোপালদাসাত্মজ, সন্তোষাগর্ভজাত, গঙ্গাদাসনামক কবি স্বীয় অভীষ্টদেবতা শ্রীকৃষ্ণকে প্রণাম করিয়া ছন্দঃশাস্ত্র প্রণয়ন করিতেছেন।

২। মনীষিগণের বিরচিত বহু ছন্দোগ্রন্থ বর্ত্তমান থাকিলেও বালক

इयमच्युतलीलाढ्या सद्वृत्ता जातिशालिनी ।
छन्दसां मञ्जरी कान्ता सभ्यकण्ठे लगिष्यति ॥३॥
पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ॥४॥

सत्स्वपि सारे सारार्थे पिङ्गलादीनां ग्रन्थेष्वित्यर्थः, कष्टाच्च सन्दर्भ नवका बहु कष्टार्हा ये बालका अनुकम्पार्थं नवसन्दर्भात् कथ्यत्व । तस्य तेषां श्रुतपथा इत्यथ । अथवा नवानां बालकानां कार्यं सुखार्थं । 'सुखार्थे मञ्जरिषु याम्' इति मेदिनी । मम सदाम छन्दोग्रन्थप्रणयने प्रवृत्तिरित्यर्थः ॥ २ ॥

ननु बालकार्थं प्रणीते ग्रन्थे सभ्यछन्दसां का श्रद्धा भवेदित्यत आह—इयमच्युत लीलेति । इयं वक्ष्यमाणा अच्युतस्य श्रीकृष्णस्य लीलया क्रीडया आढ्या युक्ता सद्वृत्ता मनोरमपद्यान्विता ; वृत्तं पद्ये चरित्रे च इत्यमरः । जातिशालिनी जाति मात्रानियता आर्यादयस्तैः तया शालते शोभते या सा । कान्ता मनोज्ञा छन्दसां मञ्जरी सभ्यकण्ठे सभ्यानां सामाजिकानां कण्ठे गले लगिष्यति सक्ता भविष्यति श्रीकृष्णलीलावर्णनात् सहृदया छन्दोमञ्जरीमिमां कण्ठस्थां करिष्यन्तीति भावः । पक्षे कान्ता रमणी चेति ध्वन्यते । रमणीपक्षे—अच्युता सम्पूर्णा या लीला विलासस्तया आढ्या युक्ता । सद्वृत्ता सच्चरिता । जातिशालिनी कुलीना । मञ्जर्या अपभूषणत्वेन, प्रसिद्धत्वादपि वाङ्मयत्वात् रमणीसादृश्याच्च कण्ठलग्नत्वमुक्तम् । वस्तुतस्तु श्रीकृष्ण लीलारसरसिकानां श्रोतृवर्गाणां श्रुतिभूषणे सामर्थ्यात् मञ्जरीत्वेन निर्देशः ॥ ३ ॥

इदानीं प्रकृतमारभते—पद्यमिति । चतुर्णां पादानां श्लोकस्य तुरीयभागानां समाहारश्चतुष्पदी समाहारद्विगुः । पद्यं नाम कथ्यते इति शेषः । चतुश्चरणा

দিগের চিত্ত ব্যুৎপত্তিলাভার্থ প্রাচীন গ্রন্থ হইতে সার সঙ্কলন করিয়া এই গ্রন্থ প্রণয়নে আমি প্রবৃত্ত হইতেছি।

৩। শ্রীকৃষ্ণলীলাপরিপূর্ণা বৃত্তিশালিনী জাতিশোভিতা মনোজ্ঞা এই ছন্দোমঞ্জরী সামাজিকবর্গের কণ্ঠদেশে বিরাজ করিবে।

समम‌र्द्धसमं वृत्तं विषमञ्चेति तत् त्रिधा ।
समं समचतुष्पादं भवत्यर्द्धसमं पुनः ॥५॥
आदिस्तृतीयवद् यस्य पादस्तुर्य्यो द्वितीयवत् ।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम् ॥६॥

लक्षस्य पद्यमिति संज्ञा ज्ञातव्या इत्यर्थः । तच पद्यं वृत्तं इत्याख्य, जाति जाति संज्ञकमिति एवम्प्रकारेण द्विधा द्विप्रकारं प्रसिद्धमिति शेषः । तत्र अक्षरसंख्यातं अक्षरैः एकद्व्यादिवर्ण संख्यातं परिगणितं यत् तत् वृत्तं नाम भवेत् । या, मात्रा अक्षरावयवरूपा ताभिः कृता निबद्धा सा जातिर्नाम भवेत् । गणना तु लघुवर्णे एक मात्र गुरुस्तु द्विमात्र इति एवम्प्रकारेण ज्ञातव्या । तथाच—'एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु भवेत् प्लुतो व्यञ्जनञ्चार्द्धमात्रकम्' इति ॥ ४ ॥

सममिति । तत् पूर्व्वं परिभाषितं वृत्तं समम्, अर्द्धसमं विषमञ्च इति त्रिधा त्रिविध भवति । तत्र समचतुष्पादं समाः गुरुलघ्वक्षरादिभिश्चत्वारः पादा यस्य तत् समम् । यस्य वृत्तस्य आदिः प्रथम पाद च स तृतीयवत् तृतीयपादतुल्य, एवं तुर्यः चतुर्थ पाद द्वितीयवत् द्वितीयपादतुल्य, तत् पुनः पुनरिति वाक्यभेदे अर्द्धसमं नाम पद्य - परिकीर्त्तितम् । भिन्नचिह्नचतुष्पाद भिन्न चिह्न लक्षण येषां ते भिन्नचिह्ना तादृशा चत्वार पादा यस्य तत्, विषमवृत्तं परिकीर्त्तितं कथितमित्यर्थः ॥ ५। ६ ।

৪। সংস্কৃত (ভাষা) গদ্য ও পদ্য ভেদে দ্বিবিধ। তন্মধ্যে যাহাতে চারিটী পাদ (চরণ) থাকে তাহার নাম পদ্য। মাতৃকস্য চতুর্ভাগ পাদ ইত্যভিধীয়তে' মাতৃকস্য শ্লোকস্য ইত্যর্থ। শ্লোকের চারিভাগের একভাগের নাম পাদ। ঐ পদ্য বৃত্ত ও জাতিভেদে দ্বিবিধ,—অক্ষর গণনানিয়মে নিবদ্ধ পদ্যের নাম বৃত্ত। মাত্রার সংখ্যানুসারে রচিত পদ্যের নাম জাতি।

৫—৬। ঐ বৃত্ত আবার ত্রিবিধ, যথা—সম অর্দ্ধসম ও বিষম। যাহার চারিটী চরণই সমান সমান অক্ষরে নিবদ্ধ, তাহাকে সমবৃত্ত কহে, যেমন—অনুষ্টুপ

म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥७॥
मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः।

छन्दःशास्त्रोपयोगिनः सांकेतिकान् गणान् निर्दिशति—म्यरेति। एभि र्लान्तैः दशभिः अक्षरैः मय यय रय सय तय जय भय नय लै इत्यक्षरैः समस्तं, एभिः म य र स त ज भ न ग ल इत्येभिर्दशभिरक्षरैः समस्तं वाङ्मयं व्याप्तं छन्दःशास्त्रं विष्णुना त्रैलोक्यं यथा व्याप्तं तथा। त्रयाणां लोकानां समाहारः त्रिलोकी त्रिलोकी एव त्रैलोक्यं त्रिभुवनम् इत्यमरः। अस्यायमाशयः मकारादिभिः गणैर्दशभिरेव समस्तानां छन्दसां लक्षणानि करिष्यामि इत्यर्थः ॥७॥

सर्वेति गणयति—मस्त्रीति। मः त्रिगुरुः त्रयो वर्णाः गुरवो यत्र सः कथितः। पूर्वोक्ता मकारादयो दशवर्णाः एव लक्षणाः गृहीतव्याः यथा—मदनः, दमनः, रमणः इत्यादि। त्रयो वर्णाः गुरवः यत्र मकारस्य एको न्यूनः मकारैक्यं ज्ञातव्यं। यथा—

প্রভৃতি। যাহার অর্দ্ধেক অপর অর্দ্ধেকের তুল্য তাহাকে অর্দ্ধসম বলে, অর্থাৎ প্রথম পাদে যত অক্ষর তৃতীয় পাদেও তত অক্ষর আবার দ্বিতীয় পাদে যত অক্ষর চতুর্থ পাদেও যদি তত অক্ষর থাকে তাহার নাম অর্দ্ধসমবৃত্ত। যথা— বিয়োগিনী (সুন্দরী) প্রভৃতি। যাহার চারি চরণই চারি প্রকার (অর্থাৎ প্রত্যেক চরণেই বিভিন্নসংখ্যক অক্ষর থাকে) তাহাকে বিষমবৃত্ত বলে।

৭। গ্রন্থকার নিম্নলিখিত সঙ্কেত দ্বারা ছন্দের লক্ষণ করিতেছেন।— ম য র স ত জ ভ ন গ এবং ল এই দশটি অক্ষরে সমস্ত বৃত্ত পরিব্যাপ্ত অর্থাৎ এই দশটি অক্ষর দ্বারা যে সঙ্কেত করা হইবে তদ্দ্বারাই সমস্ত বৃত্ত বুঝিতে পারা যাইবে। বিষ্ণু যেমন বিশ্বসংসার ব্যাপিয়া আছেন, এরূপ এই দশটি অক্ষর দ্বারা সমস্ত বৃত্ত পরিব্যাপ্ত।

जो गुरुमध्यगतो रलमध्य
सोऽन्तगुरु कथितोऽन्तलघुस्त ॥ ८ ॥

श्रीदुर्गा। अत्र त्रयो वर्णा एव गुरव। यथा श्रीकान्ती वागीश इत्यादि। नकार नगण त्रिलघु त्रयो लघवो यत्र स कथित, यथा—विहर विजय पवन इत्यादि। भ भगण आदिगुरु आदि प्रथमो वर्ण गुरुर्यत्र स कथित। भगणो आदिगुरु चेति कर्म्मधारय अथवा भ इति सूत्रप्रयुक्तैकवचनम्। वर्णत्रयेण हि एको गण स्यात् तत्र आदिवर्णस्य गुरुत्वाभिधानेन परौ द्वौ वर्णौ लघू इति प्रतिपत्तव्यम्। यथा—शङ्कर, मन्दर इत्यादि। य आदिलघु, आदि प्रथमो वर्ण लघुर्यत्र स कथित। आदि वर्णस्य लघुत्वाभिधानात् परौ द्वौ वर्णौ गुरू इति ज्ञेयम्। सर्व्वत्रैव एव नियमोऽनुसन्धातव्य। यगणो यथा—गुरुभ्यः महेश इत्यादि। ज गुरुमध्यगत गुरुवर्णौ मध्यगतो मध्यस्थितो यस्य स कथित, आद्यन्तौ लघू मध्यो गुरु एव जकारो गण जकार। यथा—धिनाथ, मतोऽस्मि इत्यादि। र इति सूत्रप्रयुक्तैकवचनम्। र स लघु मध्य मध्यस्थितो यस्य स कथित। आद्यन्तौ वर्णौ गुरू मध्यवर्णो लघु एव गण रवर्णेन ज्ञातव्य। यथा—चन्द्रमा ईश्वर इत्यादि। स सकार अन्त गुरु अन्त अन्तिमो वर्ण गुरुर्यत्र स कथित। आद्यौ द्वौ वर्णौ लघू अन्तिमो वर्णो गुरु एव गण सकारेण ज्ञातव्य। यथा—रमणी, शरणम् इत्यादि। त अन्तलघु अन्तो लघुर्यस्य स कथित आदिमध्यौ वर्णौ गुरू अन्तिमो वर्णो लघु एव गण तकारेण ज्ञातव्य। यथा—आम्बनि रक्षामि इत्यादि ॥ ८ ॥

৮। তিনটি তিনটি অক্ষরে এক একটী গণ হয়। পূর্ব্বোক্ত ম হইতে ন পর্য্যন্ত আট অক্ষরের নামে তিন অক্ষর ঘটিত আটটি গণ বুঝিতে হইবে। ক্রমে তিনটী অক্ষর গুরুর নাম মগন অর্থাৎ ম বলিলেই ক্রমে তিনটী অক্ষর গুরু ইহা বুঝিতে হইবে। ক্রমে তিনটী অক্ষর লঘুর নাম নগণ অর্থাৎ ন বলিলেই ক্রমে তিনটী অক্ষর লঘু ইহা বুঝিতে হইবে। এইরূপ সর্ব্বত্র। ভ বলিলে আদি অক্ষরটী গুরু (পরের দুইটী হ্রস্ব), য বলিলে আদি অক্ষরটি লঘু (পরের দুইটী

गुरुरेको गकारस्तु लकारो लघुरेकक ।
क्रमेण चैषा रेखाभिः संस्थानं दर्श्यते यथा ॥ ९ ॥
ज्ञेया सर्व्वान्तमध्यादिगुरवोऽत्र चतुष्कला ।
गणाश्चतुर्लघूपेता पञ्चार्य्यादिषु संस्थिता ॥ १० ॥

गुरुरित्यादि।—एको वर्णो गुरु गकार, गकारेण एको वर्णो गुरुः स्यात् इ(ति) बोद्धव्यम्। यथा—श्री या सा इत्यादि। एकको एको वर्ण लघुलकार लकारेण एको वर्णो लघु स्यात् इति ज्ञातव्यम्। यथा—च हि तु, इत्यादि क्रमेण मकारादिक्रमेण इत्यर्थः। एषां मकारादीनां गणानां रेखाभि आकृतिविशे चिह्नविशेषै संस्थानं आकृति दृश्यते। वक्ररूपो ककारैकदेशो गुरोराकार (ऽ) एवम् लघोस्तु सरलरेखाकार (।) एवम्। पाश्चात्यमते गुरोराकार (—) एवम्। लघ्वाकार (◡) एवम् ॥ ९ ॥

सम्प्रति जातेर्गणान् निर्दिशति—ज्ञेया इति। अत्र चतुर्लघूपेता चतुर्गुरुहि... सर्व्वान्तमध्यादिगुरव इन्द्वात् परं श्रूयमाणं शब्दं प्रत्येकमभिसम्बध्यते इति न्यायात् सर्व्वेत्र गुरुशब्दस्य सम्बन्धः, अत सर्व्वगुरु (ऽऽऽ) अन्तगुरु (।।ऽ) मध्यगुरु (।ऽ।) आदिगुरु (ऽ।) चतुर्लघु (।।।।) एवमाकारा पञ्च चतु

গুরু) জ বলিলে মধ্য অক্ষরটি গুরু মধ্য অক্ষরটী লঘু হইলে তাহার নাম রগণ স গণ দ্বারা অন্ত অক্ষরটি গুরু এবং ত গণ দ্বারা অন্ত অক্ষরটী লঘু এরূপ বুঝিতে হইবে। টীকা দ্রষ্টব্য।

৯। গ এবং ল দ্বারা একটী একটী অক্ষরের পরিচয় হয়। গ বলিলে একটী অক্ষর গুরু। ল বলিলে একটী অক্ষর লঘু এরূপ বুঝিতে হইবে। ক্রমে রেখা দ্বারা গুরু লঘু প্রদর্শিত হইবে। (ऽ) এইটী গুরু অক্ষরের চিহ্ন। (।) এইটী লঘু অক্ষরের চিহ্ন।

১। মাত্রা গণনা অনুসারে নিবদ্ধ শ্লোকের নাম জাতি ইহা পূর্ব্বেই উক্ত হইয়াছে। একণে ঐ মাত্রার নিয়ম লিখিত হইতেছে। আর্য্যাদি জাতিতে

सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।
वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा ॥ ११ ॥

त्मा चतुर्मात्रात्मका गणाः अत्र आर्य्यादिषु जातिच्छन्दःसु उपयुक्ताः [illegible] सर्वगुरुर्यथा—काली दुर्गा इत्यादि । अन्तगुरुर्यथा—तरुण ममट [illegible] मध्यगुरुर्यथा—भिवाय नमामि इत्यादि । आदिगुरुर्यथा—पुष्पित [illegible] सर्वलघुर्यथा—बुधवर, जलधर इत्यादि ॥ १० ॥

इदानीं गुरुलक्षणं निर्दिशति—सानुस्वार इति । सानुस्वारः [illegible] (अ, इ, उ ऋ लृ,) गुरुः । अत्र अनुस्वार इत्युपलक्षणम्, [illegible] स्वेऽपि लघुर्गुरुर्भवेत् । एवं दीर्घः (आ, ई ऊ, ॠ [illegible]) [illegible] च विसर्गयुक्तश्च संयोगपूर्वश्च संयोगः संयुक्तवर्णः [illegible] पादान्तगः चरणस्यान्तिमो लघुस्वरः वा विकल्पेन गुरुः [illegible] स्थितो गुरुरपि वर्णो विकल्पेन गुरुः स्यात् । अत्र [illegible] लघुवर्णो विकल्पेन गुरुर्भवेत् जातिषु तु लघुगुरुः [illegible] यम् । अत्रापि पादान्तस्थितस्य लघुवर्णस्य गुरुत्वे [illegible] दोषः अन्यथा तु दोष एव तथा च [illegible] मस्याणि वस्त्राणि च । अत्र वस्त्राण्यपीदि [illegible] वन्यस्य हृदतैव पादान्तिमलघोगुरुत्वे [illegible] सुक्तं तत् सर्व्वत्र द्वितीयचतुर्थपादा[illegible]

अत्र पादान्तगो लघुर्गुरुर्भवेद्वा। यथा—

तक्रं सपत्रशाकं, नवान्नं विचित्राणि च दधीनि।
अल्पव्ययेन सुन्दरि ग्राम्यजनो मिष्टमश्नाति॥ १२॥

सुन्दरीति मान्यशब्दे परे विकल्पेन लघुत्वम्। यथा मत्पितुः पारिजातहरणनाटके—

सिन्दूरपूरगतगैरिकरागशोभे प्रस्यन्दमदस्रवणनिर्झरवारिपूरे।
संग्रामभूमिगतमत्तसुरभकुम्भकूटे मन्नीयनखराशनयो विशन्तु॥१३॥

पादान्तस्थितस्य लघोर्विकल्पेन गुरुत्वमुदाहरति—तक्रमित्यादि। हे सुन्दरि! ग्राम्यजनः अल्पव्ययेन तक्रं नवं सपत्रशाकं नवीनं नूतनतण्डुलान् विचित्राणि चिपिटानि दधीनि च मिष्टं यथा स्यात् तथा अश्नाति भुङ्क्ते। अत्र आर्याजातिः छन्दः। अस्य लक्षणम् प्रथमपादे द्वादशमात्रा द्वितीयपादे अष्टादशमात्रा तृतीयपादे पुनर्द्वादश मात्रा चतुर्थपादे पञ्चदशमात्रा इति। उल्लिखिते श्लोके द्वितीयपादचतुर्थपादयोरन्तिमवर्णयोर्लघोरपि गुरुत्वम्। एवं तृतीयपादे सुन्दरि इति इकारस्य मान्य इति संयुक्तवर्णात् पूर्व्ववर्त्तित्वेन गुरुत्वेऽपि पादान्तत्वात् लघुत्वम्। अत पादान्तगुरोर्लघुत्वस्वीकारेण एकमात्राह्रासात् तृतीयपादे द्वादशमात्रा एव मातव्या अतश्छन्दोभङ्गो न शङ्कनीयः॥ १२॥

इमं पादान्तस्थस्य गुरुत्वमुदाहरति—सिन्दूरेति। इन्द्र प्रति कुपितस्य गरुडस्य उक्तिरियम्—मदीया नखरा एव अशनयः कुलिशानि सिन्दूरपूरैः सिन्दूरौघैः इव लग्न

মাত্রাবিশিষ্টের নাম দীর্ঘ তিন মাত্রা বিশিষ্টের নাম প্লুত এবং অর্দ্ধমাত্রাযুক্তের নাম ব্যঞ্জন। একটী লঘুবর্ণে একটী মাত্রা বুঝিতে হইবে। একটী দীর্ঘবর্ণ দুইটী মাত্রা হয়। যেমন কাশী' এইটী সর্ব্বগুরু। এখানে মাত্রা চারিটী আছে। কমলা এখানে অন্তগুরু ৪টী মাত্রা। 'গণেশ' এখানে মধ্যগুরু—মাত্রা চারিটী। 'শঙ্কর' এখানে সংযোগের পূর্ব্ব গুরু অতএব আদিগুরু—৪টী মাত্রা। 'গগণপতি' সর্ব্বলঘু এখানে ৪টী মাত্রা পাওয়া গেল।

अत्र तृतीयचतुर्थपादान्तलघोर्गुरुत्वम् । तथा ममाच्युतचरितेऽपि—

रक्तेन केशिदमनक्षतसम्भवेन, रेजे स मण्डिततरो हरिबाहुदण्डः ।
तद्दन्तसन्दलितभीमभुजप्रतापवह्नेरिव स्फुटकणप्रकरेण कीर्णः ॥१४॥

गैरिकवस्य शोभा यस्य तस्मिन् । प्रश्रत् निरन्तरं यत् मदप्रवणं दानवारणं तदेव निर्झरवारिपूरं प्रस्रवणजलौघः यत्र तस्मिन् । संग्रामभूमिगतः रणदेशगतः यः मत्तः सुरेभः सुरहस्ती ऐरावतः तस्य कुम्भ एव कूटं तस्मिन् । 'कूटोऽस्त्री शिखरं शृङ्ग' मित्यमरः । विशन्तु प्रविशन्तु । एकदेशविवर्त्तिरूपकमलङ्कारः । तदुक्तम्—'यत्र कस्यचिदार्थत्वमेकदेशविवर्त्ति तत्' दिति । वसन्ततिलकं वृत्तम् । अत्र 'श' 'न्तु' वर्णयोः तृतीयचतुर्थपादान्तस्थयोर्लघ्वोरपि गुरुत्वम् । १३ ॥

रक्तेनेत्यादि । स हरिबाहुदण्डः हरेर्बाहुरेव दण्डः रूपककर्मधारयः । केशिदमनक्षतसम्भवेन रक्तेन केशी नाम कश्चिद्दानवः तस्य दमने दलने यत् क्षतं व्रणं तत्सम्भवेन तज्जातेन रक्तेन रुधिरेण मण्डिततरः अतिशयेन भूषितः सन्, तस्य केशिनो दानवस्य दन्तैः सन्दलितः यः भीमः भयङ्करः भुजः बाहुस्तस्य प्रताप एव वह्निः तस्य स्फुटः उद्दीप्तः यः कणप्रकरः कणानां समूहः तेन समुज्ज्वलस्फुलिङ्गनिचयेन इत्यर्थः, कीर्णः व्याप्त इव रेजे शोभितवान् । 'विस्फुलिङ्गोऽग्निकणः' इत्यमरः । वह्नेरिति रूपकम् । स्फुटकणप्रकरेण कीर्ण इवेति उत्प्रेक्षा । तत उभयोः सङ्करः इति । वसन्ततिलकं नाम वृत्तम् । अत्र प्रथमपादान्तिमस्य नकारस्य तृतीयपादान्तिमस्य पकारस्य च गुरुत्वं बोध्यम् । १४ ॥

১১—১৩। অনুস্বারযুক্ত দীর্ঘ বিসর্গসংযুক্ত বর্ণ এবং সংযুক্ত বর্ণের পূর্ববর্ণ গুরু হয়। পাদের অন্তস্থিত লঘুবর্ণ বিকল্পে গুরু এবং গুরু বর্ণ বিকল্পে লঘু হইয়া থাকে। পাদের অন্তস্থিত বর্ণের লঘু গুরু ব্যবস্থা প্রয়োজনা

अत्र प्रथमतृतीयपादान्तस्यापि लघोर्गुरुत्वम्।

'प्रङ्के वा" इति पुन पिङ्गलमुनेर्विकल्पविधायक सूत्रम्।

उदाहरण यथा कुमारे—

सा मङ्गलस्नानविशुद्धगात्री गृहीतप्रत्युद्गमनीयवस्त्रा।

निर्वृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधेव रेजे॥ १५॥

अत्र प्रशब्दे परे गुरोर्लघुत्वम्।

प्राप्य नाभिह्रदमज्जनमाशु प्रस्थित निवसनग्रहणाय।

औपनिविकमरुन्ध किल स्त्री वल्लभस्य करमात्मकराभ्याम्॥१६॥

प्रङ्के वेति। प्रे अथवा क्रे परवर्त्तिनि पूर्व्वस्थितो लघुर्विभाषया गुरु स्यादित्यर्थ पिङ्गलमुनि' प्रङ्के वा' इति विशेषसूत्रं प्रणिनाय इति मल्लादानेन समुल्लिखितम् किन्त्वस्माभि प्रचलित पिङ्गलच्छन्द सूत्रे नैतत् सूत्रं दृश्यते।

सा मङ्गलेति।—मङ्गलस्नानेन मङ्गलार्थनिमज्जनेन विशुद्ध गात्रं यस्या सा पूत देहा इत्यर्थ। गृहीत धृत प्रत्युद्गमनीयवस्त्रं विशुद्धयुग्मवसनं यया तादृशी पार्व्वती पर्व्वतस्यापत्यं स्त्री हैमवती निर्वृत्तपर्जन्यजलाभिषेका निर्वृत्त निष्पन्न पर्जन्यस्य मेघस्य जलेन अभिषेक स्नानं यस्या सा मेघाम्बु सिक्ता इत्यर्थ। प्रफुल्लकाशा विकसितकाशकुसुमा वसुधा पृथिवी इव रेजे शोभितवती। इन्द्रवज्रोपजाति। अत्र प्रेति संयुक्तात् पूर्व्ववर्त्तिन गृहीत इति तृतीयस्वरस्य प्रङ्के वेति विशेषविधानात् लघुत्वम् ततश्च छन्दोभङ्गदोषो न सञ्जात इति॥ १५॥

प्राप्येत्यादि। स्त्री कामिनीति शेष। आत्मकराभ्यां स्वकीयाभ्यामेव पाणिभ्यां नाभिरेव ह्रद तत्र मज्जन प्राप्य आशु तत्क्षणात् निवसनग्रहणाय वस्त्रसमाकर्षणाय प्रस्थित प्रवृत्त औपनिविकं नीविसमीपे चलितमित्यर्थ वल्लभस्य प्रियस्य कर

হ্রসান্তে ইহবে। এ এর, ত্র শব্দের পূর্ববর্ত্তী বর্ণ বিকল্পে গুরু হয়—ইশ

अत्र ह्रशब्दे परे गुरोर्लघुत्वम् । तीव्रप्रयत्नोच्चारणेनात्र लघुत्वमिति कण्ठाभरण, यदुक्तम्,—

यदा तीव्रप्रयत्नेन संयोगादेरगौरवम् ।
न छन्दोभङ्ग इत्याहुस्तदा दोषाय सूरय ॥ १७ ॥

अत्रत्य किल रोषमभिनीतवतीत्यर्थः । अत्र नाभि इति इकारस्य ह्रे इति संयुक्तात् पूर्व्वस्य सत्यपि गुरुत्वनियमे "प्रह्रे वेति" विधिप्रत्ययेन वैकल्पिकविधानात् ह्रस्वत्व ततश्च न छन्दोभङ्गदोष सञ्जात इति ॥ १६ ॥

तीव्रेति—तीव्रप्रयत्नोच्चारणेन तीव्र उत्कट प्रयत्न यस्मिन् तादृश यत् उच्चारण तेन गुरोरपि लघुत्व स्यात् इति कण्ठाभरणो वदति । यत्र संयोगपूर्व्वस्येति संयुक्त वर्णात् पूर्व्ववर्त्तिनो वर्णस्य गुरुत्वनियमो न सार्व्वत्रिक इति पूर्व्वाचार्य्याणां मतमाह—यदेति । यदा तीव्रप्रयत्नेन द्रुततरपठनप्रयत्नेन संयोगादे संयुक्तपूर्व्ववर्णस्य अगौरव लाघवं भवतीति शेष । तदा छन्दोभङ्ग न दोषाय न दोषकर इति सूरय पूर्व्व-पण्डिता आहु कथयन्ति । उच्चारणप्रयत्नवशेन यदि सुश्रवता स्यात् तदा छन्दोभङ्गोऽपि न दोषकर इति । यथा—'नाह वाम्नी सुबाहुर्महाविशिरस्तौ दूषणम्लारकाद्य मिति । अत्र उच्चारणप्रयत्नेन महाविशिरसौ इति संयुक्तात् 'शि' इति पदात् पूर्व्ववर्त्ती स्वर इति अकार लघुरिव प्रतिभातीति प्राचीनानां मतमिद अर्व्वाचीनैर्न गृह्यते । १७ ॥

পিঙ্গলমুনির মত বলিয়া গ্রন্থকার লিখিয়াছেন। (কিন্তু প্রচলিত পিঙ্গলসূত্রে এই সূত্র দেখিতে পাওয়া যায় না।) উদাহরণ মূলে দ্রষ্টব্য।

১৭। মূলোক্ত 'প্রাণা নাভিহ্রদ ইত্যাদি শ্লোকে 'হ্র' এই অক্ষরের পূর্ব্ববর্ত্তী অক্ষরটি যে লঘু হইয়াছে (নচেৎ ছন্দোভঙ্গ হয়) তাহার কারণ তীব্র প্রযত্নে উচ্চারণ—ইহা কণ্ঠাভরণ বলেন। যখন দ্রুতভাবে পড়িবার প্রয়োজন হয়,

यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते ।
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया ॥१८॥

क्वचिच्छन्दस्यन्ते यतिरभिहिता पूर्वसूरिभि
पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च ।
पुनस्तत्रैवासौ स्वरविहितसन्धिः श्रयति तां
यथा कृष्ण पुष्यात्त्वतुलमहिमा मां करुणया ॥१९॥

सम्प्रति यतिलक्षणं निर्दिशति—यतिरिति । जिह्वाया इष्टं यत् विश्रामस्थानं कविभिः सा यतिरुच्यते निगद्यते । यत्र जिह्वा स्वेच्छया उच्चारणाद्विरमति तदेव यतिरित्यर्थः । सा च यतिः निजेच्छया उच्चारयितुरिच्छया वाच्या विच्छेदविरामाद्यैः निर्देश्या । विच्छेदविरामविरतिप्रभृतयः शब्दा यतिपर्याया ज्ञातव्याः । १८ ।

विशेषमाह—क्वचिदिति । पूर्वसूरिभिः पूर्वपण्डितैः अभिहिता कथिता यतिः क्वचित् छन्दसि अन्ते वर्त्तते न सर्व्वत्रेति भावः । किन्तु सा यतिः पदान्ते स्थिता सती शोभामुत्कर्षं व्रजति लभते । यत्र छन्दसि यतिनियमस्तत्र चेत् सा पदान्ते नियम्यते तर्हि तस्याः सुश्रवतेति भावः । सा यतिः यदि पदमध्ये स्थिता तदा शोभां त्यजति पदमध्यस्थिता यतिरतिदुःश्रवेति भावः । पुनः किन्तु तत्रैव पदमध्ये एव असौ यतिः स्वरविहितसन्धिः स्वरेण विहितः कृतः सन्धिर्येन सा सती तां शोभां श्रयति अवलम्बते । अत्र उदाहरणं दर्शयति—यथेत्यादि । अतुला न विद्यते तुला उपमा यस्य तादृश महिमा महत्त्वं यस्य स अतुलमहिमा कृष्णः करुणया मां पुष्यात्

এমন সংযুক্ত বর্ণের পূর্ব্ববর্ণ হ্রস্ব বলিয়া নির্ণীত হইতে পারে ইহাতে ছন্দোভঙ্গ হয় না ইহাই প্রাচীন পণ্ডিতদিগের মত।

১৮। যে যে স্থলে জিহ্বা স্বেচ্ছাপূর্ব্বক বিশ্রামলাভ করে তাহাকে 'যতি' বলে। উহা উচ্চারণকারীর ইচ্ছানুসারেই হইয়া থাকে। বিচ্ছেদ বিরাম প্রভৃতির নামান্তর যতি।

अयञ्च श्लोकश्छन्दोगोविन्दे मम गुरोः ।

श्वेतमाण्डव्यमुख्यास्तु नेच्छन्ति मुनयो यतिम् ।
इत्याह भट्टः स्वग्रन्थे गुरुर्मे पुरुषोत्तमः ॥ २० ॥

अतएव मुरारिः ।—

सन्तुष्टे तिसृणां पुरामपि रिपौ कण्डूलदोर्मण्डली-
लीलालूनपुनःप्ररूढशिरसो वीरस्य लिप्सोर्वरम् ।
याच्ञादैन्यपराञ्चि यस्य कलहायन्ते मिथस्त्वं वृणु
त्वं वृणीष्वेत्यमितो मुखानि स दशग्रीवः कथं कथ्यताम् ॥२१॥

रयुतु । अत्र शिखरिणी नाम छन्दः 'रसै रुद्रैश्छिन्ना' इत्यादि तल्लक्षणम् । शिखरिण्योऽत्र प्रथमतः षड्भिरक्षरैर्यतिः कार्या । उन्नीयते यथेत्यान्पिपादे पुण्येति पर्यन्तं प्रथमा यतिः सा च पदमध्ये स्थिता दुःश्रवेति । पुण्यात्मसुखेति स्वरसन्धिवशतोऽपि शोभाभावः । कविकल्पलतायाम्—एवं यथायथोद्वेगं सुधियां नोपजायते । तथा तथा मधुरता निमित्तं यतिरिष्यते ॥" यत्र यतिनिर्देशे दुःश्रवता न स्यात् तत्र सा यतिरादरणीयेति फलितार्थः ॥ १९ ॥

अथ कश्चिदित्यादि श्लोको मम गुरुभट्टपुरुषोत्तमस्य छन्दोगोविन्दनामकग्रन्थे वर्तते । श्वेतेत्यादि ।—श्वेतमाण्डव्यमुख्याः श्वेतमाण्डव्यप्रभृतयः पण्डिताः यतिं न इच्छन्ति न स्वीकुर्वन्ति इति मे मम गुरुरध्यापकः पुरुषोत्तमभट्टः स्वग्रन्थे आह उक्तवान् । मतमिदं न मनोरमं यतिभ्रंशोपपत्तेः । यथाह काव्यादर्शे ।—श्लोकेषु नियतस्थाने पदच्छेदं यतिं विदुः । तदपेतं यतिभ्रष्टं श्रवणोद्वेजनं यथा ॥ २० ॥

सन्तुष्ट इत्यादि । मुरारिकृतश्लोकोऽयम् । जनकं प्रति रावणपुरोहितस्य शौष्कलस्य उक्तिरियम् । तिसृणां पुरां पुरीणाम् । 'पूः स्त्री पुरीनगर्यौ' इत्यमरः । रिपौ त्रिपुरहरे शिवे इत्यर्थः अतन्तुष्टेऽपि तपस्यया सन्तुष्टे शिवे वरमन्तरेणाद्युपस्थितेऽपि कण्डू

১৯—২০। যতি ছন্দের সর্বত্র থাকে না। যদি পদান্তে যতি থাকে তবে

जयदेवोऽपि।—

साध्वी माध्वीक चिन्ता न भवति भवतः शर्करे कर्कशासि
द्राक्षे द्रक्ष्यन्ति के त्वाममृत मृतमसि क्षीर नीरं रसस्ते।
माकन्द क्रन्द कान्ताधर धरणितलं गच्छ यच्छन्ति यावद्
भावं शृङ्गारसारस्वतमयजयदेवस्य विष्वग्वचांसि॥ २२॥

तया युद्धकण्डूयनयुक्तया कण्डूः विद्यतेऽस्याः इति कण्डूशब्दात् मत्वर्थे लच्प्रत्यये कण्डूला इति पदम्। दोर्दण्डस्था बाहुसमूहेन करणेन लीलया अवहेलया लूनानि छिन्नानि पुनः प्ररूढानि पुनः सञ्जातानि शिरांसि यस्य तादृशस्य वेरवाञ्छित त्रिपुरारेः सौम्यस्य वीरस्य रावणस्य मुखानि याच्ञा दैन्य प्रार्थनाजनितदीनभाव तेन पराञ्चि पराङ्मुखानि सन्ति अभितः समन्ततः मिथः परस्परं त्वं ब्रूहि त्वं ब्रूहि इति कलहायन्ते कलहं कुर्वन्ति। स च महेश्वरात् वरप्रार्थनामपि कर्त्तुं कुण्ठितः दशग्रीवः कथं कथ्यतां वर्णनीयता भवेदिति शेषः। इदृशा महामहिमशाली नैव वर्णयितुं शक्य इति। शार्दूलविक्रीडितं नाम छन्दः। छन्दोऽस्मिन् द्वादशाक्षरावसाने यतिः यता मा च सप्तमपादे कामदाङ्के इति ह्रावसानि सर्वाचिता॥ २१॥

जयदेवकृतश्लोको यथा—साध्वीति। हे माध्वीक! हे मधो! इह अस्मिन् लोके यावत् यत्कालपर्यन्तं शृङ्गारसारस्वतमयजयदेवस्य शृङ्गाररसमयप्रबन्धकर्त्तृजयदेवस्य वचांसि वाक्यानि विष्वक् समन्तात् भावं प्रीतिं यच्छन्ति ददति तावत् भवतः चिन्ता साध्वी मनोरमा न भवति। हे शर्करे! त्वं कर्कशा असि कठिनत्वादित्यर्थः। हे द्राक्षे! त्वां के रसिका द्रक्ष्यन्ति अगम्यदेशजातत्वात् केऽपि न त्वामाद्रियन्ते। हे अमृत! त्वं मृतमसि जीवन् कस्त्वां माप्नोतीति भावः। हे क्षीर! ते तव रसः नीरं जलतुल्यम् आस्वादनात् पुष्पमलादुत्वात्। हे माकन्द! चूतफल! त्वं क्रन्द! अम्लत्वाद्यसारगुणत्वात्। हे कान्ताधर! वनिताधर। त्वं धरणितलं

চমৎকারাতিশয় হয়। পদমধ্যে উহা থাকিলে শোভা নষ্ট করে। কিন্তু উক্ত

एवमन्योऽपि ।—

कत्यद्रिप्रतिरोधिता कति नदीपाथोनिधिप्लाविता
कत्येवाटविता गता कति न वा भूदेवदेवैर्हृता ।
भूम्यो भूमिपतीन्द्र तावकयश प्रस्तावनामण्डली
कोष्ठीकृत्य जगद्धन कतिवराटीभिर्मुदं यास्यति ॥ २३ ॥

रसातलं गच्छ, तव पृथिव्यामवस्थानं न युक्तमित्यर्थ । माध्वीकादि सम्मुख्यमान पदार्थेभ्य जयदेववर्णितवाक्यस्य माधुर्याधिक्यमिति माध्वीकादिषु तिरस्कार । स्रग्धरा नाम वृत्तम् । अत्र तृतीयचरणे सप्तमाक्षरेण विहिता यति स्वरसन्धिवशत सुस्पष्टैव । किन्तु चतुर्थपादे सप्तमचतुर्दशयोर्यतिर्नैव इति ॥ २२ ॥

कत्यद्र्यादि ।—कस्यचित् नृपस्य प्रशस्तिरियम् । हे भूमिपतीन्द्र । भवत कति भूमा भूप्रदेशा अद्रिणा पर्वतेन प्रतिरोधिता व्याप्ता । कति भूम्य, नदाश्च पाथोनिधयश्च तै प्लाविता । कति एव कति वा भूमय, अटवीतां अरण्यत्व गता प्राप्ता गिरिषु अरण्येषु नदीषु समुद्रेषु च भवतो राजत्वमित्यर्थ । कति भूम्य भूदेवैर्ब्राह्मणै देवैश्च न वा हृता गृहीता ब्राह्मणाम् संस्थाप्य देवांश्च प्रतिष्ठाप्य तद्भ्य भूमयस्तेभ्यो दत्ता इत्यर्थ । तावकयश प्रस्तावनामण्डली त्वदयश कीर्तनपरम्परा जगद्धन जगतो वित्तं कोष्ठीकृत्य सञ्चयित्वा विषयीकृत्येति यावत्, कतिवराटीभि कतिपयैर्वराटकै मुद सन्तोष यास्यति लप्स्यते सामान्यं जगद्धन भवतो नोपयुक्तमिति मत्वा सन्तोषं न प्राप्स्यतीत्यर्थ । अथवा जगद्धन जगद्धननामक कश्चित् भवदधीन भौमिकं कोष्ठीकृत्य आक्रम्य कतिवराटीभिर्मुद सन्तोषं यास्यति लप्स्यते । भवत कति भूमय कतिभि प्रकारै करायत्ता इत्यत्र अतो यत्किञ्चित् भूखण्डमुपभुञ्जतो मम पीडनं न युक्तमिति । अत्र चतुर्थचरणे द्वादशाक्षरे यतिभङ्ग कविनानेन समादृत ॥ २३ ॥

যতি যদি স্বরবিহিতসন্ধিসমন্বিত হয় তবে তাহাতে উৎকর্ষ বৃদ্ধিই হয়। উদাহরণ মূলে দ্রষ্টব্য।

आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्द्धितैः ।
पादैरुक्थादिकं स्याच्छन्दः षड्विंशतिं गतम् ॥२४॥
उक्थात्युक्था तथा मध्या प्रतिष्ठान्या सुपूर्विका ।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥२५॥
त्रिष्टुप् च जगती चैव तथातिजगती मता ।
शक्करी सातिपूर्वा स्यादष्ट्यत्यष्टी तथा स्मृती ॥२६॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः ।
विकृतिः सङ्कृतिश्चैव तथातिकृतिरुत्कृतिः ।
इत्युक्ताश्छन्दसां संज्ञा क्रमशो वच्मि साम्प्रतम् ॥२७॥

इति छन्दोमञ्जर्यां सुखसन्धानं प्रथमः स्तबकः ।

अधुनाक्षरसंख्यैकमेव समग्राणां नामभेदान् दर्शयति—आरभ्येति । एकमक्षरं यत्र तादृशात् पादात् आरभ्य एकाक्षरं पादमवधिं कृत्वा इत्यर्थः एकैकम् एकैकेन अक्षरेण वर्द्धितैः पादैः आरब्धं षड्विंशतिं गतं षड्विंशतिप्रकारकं उक्थादिनामकं छन्दः स्यात् । एकाक्षरेण रचितपादस्य छन्दसः नाम उक्था अक्षरद्वयेन रचितपादस्य नाम अत्युक्था एवं क्रमेण षड्विंशत्यक्षरं यावत् षड्विंशतिप्रकारं नाम भवत्यस्य । यथा—१ उक्था २—अत्युक्था । ३—मध्या । ४—प्रतिष्ठा । ५—सुप्रतिष्ठा । ६—गायत्री । ७—उष्णिक् । ८—अनुष्टुप् ९—बृहती । १०—पङ्क्ति । ११—त्रिष्टुप् । १२—जगती । १३—अतिजगती । १४—शक्करी । १५—अतिशक्करी । १६—अष्टी । १७—अत्यष्टी । १८—धृति । १९—अतिधृति । २०—कृति । २१—प्रकृति । २२—आकृति । २३—विकृति । २४—सङ्कृति । २५—अतिकृति । २६—उत्कृति ॥ २४—२७ ॥

पूर्वाचार्यैरेवम्भिरेव छन्दसामुक्थादिनामभेदा उक्ताः । अत्र पुनस्तानवान्तरान् सत्यप्यवधिर्द्धं प्रचुरतर लघुगुरुभेदेन बहून् नामभेदान् प्रदर्शयिष्यामि ।

समाप्तेयं प्रथमस्तबकव्याख्या ।

২৪। অক্ষরের হ্রাস বৃদ্ধি অনুসারে সমবৃত্তছন্দের নাম নির্দ্দেশ করিতেছেন,— এক অক্ষরবিশিষ্ট চরণ হইতে আরম্ভ করিয়া এক এক অক্ষর বৃদ্ধি হইয়া ২৬ অক্ষর পর্য্যন্ত ছন্দের নাম উক্থাদি। অর্থাৎ যে শ্লোকের প্রত্যেক চরণে ১টি বর্ণ থাকে, তাহাকে উক্থা। দুইটী করিয়া বর্ণ প্রত্যেক চরণে থাকিলে অত্যুক্থা, এরূপ ৩টি থাকিলে মধ্যমা, এইরূপ ২৬ অক্ষর পর্য্যন্ত বিভিন্ন নাম হইবে। মূল দ্রষ্টব্য॥

द्वितीयः स्तवकः।

अथ समवृत्तम्।

उक्था (एकाक्षरा इति)।

ग

१। गः श्रीः।

श्रीस्ते। सास्ताम्॥

१। एकाक्षरपादं छन्दः निर्दिशति—ग श्रीरिति। यस्य पादे ग एको वर्णो गुरुः सा श्रीनाम छन्दः गुरुवर्णघटितपादत्वात् छन्दः श्रीरिति नाम ज्ञातव्यमर्थः। सर्वेष्वेव लक्षणेषु मन्दविन्यासमेधुर्येण पुनरुदाहरणोक्तेष्वपि कुमाराणां बोधसौकर्याय सर्वमेव पृथगक्षरेण पुनरुदाहरणानि दर्शयामि तत्र प्रथमं श्रीछन्दस उदाहरणं यथा—श्रीरिति। सा प्रसिद्धा भारती सरस्वती वा श्री तव सम्पदं आस्ताम् अस्तु। अथवा सा (यद्वा लक्ष्मीः) श्री श्रीनाम छन्दः ते तव अस्तु प्रसन्नीभूय भवतु इत्यर्थः। कविना श्रीमतीत्वेव उदाहरणेषु तत्तच्छन्दसां नामान्यपि दर्शितानि।

১। প্রত্যেকপাদে 'গ' গণ মাত্র থাকিলে (অর্থাৎ একটী গুরু অক্ষর মাত্র একপাদে থাকিলে) তাহাকে 'শ্রী'ছন্দ বলা হয়। (সর্বত্র উদাহরণ মূলে দ্রষ্টব্য)।

अत्युक्ता (द्व्यक्षरा इति)।

ग ग

२। गौ 'स्त्री'।

गोपस्त्रीभिः। कृष्णो रेमे॥

मध्या (त्र्यक्षरा इति)।

म

३। मो 'नारी'।

गोपानां नारीभिः। श्लिष्टोऽव्यात् कृष्णो वः॥

र

४। रो 'मृगी'।

सा मृगीलोचना। राधिका श्रीपतेः॥

२। द्व्यक्षरपादं वृत्तं लक्षयति—गाविति। यत्र गौ द्वाविव वर्णौ गुरू वर्त्तेते सा स्त्री नाम वृत्तमुच्यते। यथा—गोप इत्यादि। पद्यार्थः—कृष्णः गोपस्त्रीभिः सह रेमे क्रीडितवान्।

३। म इति। यस्याः पादे म मगणः अर्थात् त्रय एव वर्णा गुरवः सन्ति, सा नारी नाम वृत्तं भवेत्। उदाहरणं यथा—गोपानामित्यादि। गोपानां नारीभिः श्लिष्ट आलिङ्गितः कृष्णः वः युष्मान् अव्यात् रक्षतु।

४। र इति। यस्याः पादे र—आद्यन्तगुरुमध्यलघ्वात्मकः रगणः वर्त्तते सा मृगी

২। প্রত্যেকপাদে দুইটি "গ" গণ (গুরু অক্ষর) মাত্র থাকিলে তাহা স্ত্রী' ছন্দ বলা হয়।

৩। যে ছন্দের প্রত্যেকপাদে একটি করিয়া ম" গণ (তিনটী গুরু বর্ণ) মাত্র থাকে তাহাকে "নারী" ছন্দ কহে।

৪। প্রত্যেক পাদে একটি র গণ (আদি ও অন্ত গুরু মধ্যলঘু) মাত্র থাকিলে তাহাকে 'মৃগী' ছন্দ কহে।

प्रतिष्ठा ('चतुरक्षरा जातिः')

ग म

५। ग्मौ चेत् 'कन्या'।

भास्वत्कन्या सैका धन्या। यस्याः कूले कृष्णोऽखेलत्॥

न ग

६। नगि 'सती'।

सुररिपो तव पदम्। नमति सा ननु सती॥

नाम छन्दः भवेत्। यथा—श्रीत्यादि। श्रीपते श्रीकृष्णस्य या मृगीलोचना, मृग्या हरिण्या लोचने इव लोचने यस्याः सा राधिका प्रेयसी इत्यर्थः

५। ग्माविन्यादि। यत्र प्रकृतिच्छन्दसि ग्मौ इति। यथा पादे गः एको गुरुः एवं मश्च मगणश्च वर्तते। चत्वारो गुरव इत्यर्थः। सा कन्या नाम छन्दो भवेत्। उदाहरणं यथा—भास्वदित्यादि। सा एका केवला भास्वतः सूर्यस्य कन्या यमुना। 'भास्वद्विवस्वद्दिव्यद्युतिः' 'कालिन्दी सूर्यतनया' इत्यादि च अमरः। धन्या पुण्यशालिनी। यस्याः भास्वत्कन्यायाः कूले तीरे कृष्णः अखेलत् क्रीडितवान्।

६। नगीत्यादि। यत्र यस्य नगौ समाहारः तस्मिन् नगि। समस्य कथनम्। विपदपावके वृत्तादौ गुरोश्चात् ग इति गकारान्तनिर्देशः। नगणे त्रिलघुरूपे तत एकस्मिन् गुरौ च सति सती नाम छन्दो भवेत्। उदाहरणं—सुरेत्यादि। ननु हे मुररिपो। श्रीकृष्ण। प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु इति काव। सा सती साध्वी गोपिका तव पदं नमति प्रणमतीत्यर्थः।

৫। যে ছন্দের প্রত্যেকপাদে একটী গ গণ ও একটী ম গণ (অর্থাৎ চারিটী গুরু অক্ষর) মাত্র থাকে তাহাকে কন্যা ছন্দ কহে।

৬। যে ছন্দের প্রত্যেকপাদে প্রথমে একটী ন গণ (অর্থাৎ তিনটী লঘু) ও তৎপরে একটী গ গণ (একটী গুরু) মাত্র থাকে তাহাকে সতী ছন্দ কহে।

सुमतिका (पद्याक्षरा इति,)।

भ ग ग

७। भगौ गिति 'पङ्क्तिः' ।

कृष्णसनाथा तर्णकपङ्क्तिः । यामुनकच्छे चारु चचार ॥

स ल ग

८। सलगैः 'प्रिया' ।

व्रजसुभ्रुवो विलसत्कला । अभजन् प्रिया सुरवैरिणः ॥

७। भगावित्यादि। यत्र भगौ—भगणः गद्वयञ्च वर्त्तते एतेन प्रथमो वर्णो गुरुस्ततो वर्णद्वयं लघु ततो वर्णद्वयं गुरु, एवम्प्रकाराः पञ्च वर्णा वर्त्तन्ते सा पङ्क्तिर्नाम वृत्तं भवेत् इत्यर्थः। उदाहरणं यथा—कृष्णेति। तर्णकपङ्क्तिः वत्ससमूहः "समौ वत्सतर्णकौ" इत्यमरः। कृष्णसनाथा कृष्णसहिता सती, यामुनकच्छे यमुनायाः अयं यामुनः स चासौ कच्छश्चेति तस्मिन् यमुनापुलिने इत्यर्थः। "जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविधः" इत्यमरः। चारु मनोरमं यथा स्यात् तथा क्रियाविशेषणम्। चचार भ्रमति स्म। चरधातोर्लिटि रूपम्।

८। सलगैरिति। सगण लगण गश्च सलगास्तैः प्रिया नाम वृत्तं भवेत्। यस्याः पादे प्रथमतो वर्णद्वयं लघु ततः एको गुरुः ततः एको लघुः ततश्च एको गुरुर्वर्त्तते सा प्रिया भवेदित्यर्थः। यथा—व्रजसुभ्रुव इत्यादि। अस्यार्थः।—विलसत्कला विलसन्त्यः स्फुरन्त्यः कला इत्यादयः कामविद्या यासां ताः व्रजसुभ्रुवः व्रजयोषितः सुरवैरिणः श्रीकृष्णस्य प्रियाः दयिताः अभजन्।

৭। যে ছন্দের প্রত্যেকপাদে প্রথমত "ভ" গণ (অর্থাৎ আদি অক্ষর গুরু ও পর দুইটী লঘু) ও পরে দুইটী "গ" গণ মাত্র থাকে তাহাকে "পঙ্‌ক্তি" ছন্দ কহে।

৮। যে ছন্দের প্রত্যেক পাদে প্রথমত একটী "স" গণ (২টী লঘু

गायत्री (षडक्षरा वृत्तिः)।

त य

९। त्यौ चेत् 'तनुमध्या'।

(क) मूर्तिर्मुरशत्रोरत्यद्भुतरूपा।
आस्तां मम चित्ते नित्यं तनुमध्या॥

(ख) मध्यस्थित ददर्श कुम्भानि कपीन्द्रः।
हारीत्यवतानां, हारीत्यवतानाम्॥

इति भट्टी १०।१५।

पादान्तस्थेन ददर्शेत्यत्र गुरुत्वम्।

९। त्याविति। तश्च यश्च त्यौ चेत् यदि त्यौ गणौ भवेतां तदा तनुमध्या नाम छ[न्दो] भवति। यस्याः पादे तगणो यगणश्च भवतः सा तनुमध्या नाम वृत्तम्। यथा— मूर्तिरित्यादि। अस्यार्थः—अत्यद्भुतं रूपं यस्याः सा, तनु क्षीणं मध्यं यस्याः सा, मुरशत्रोः श्रीकृष्णस्य मूर्तिः मम चित्ते आस्ताम्।

एकादशादिसर्गस्य श्लोकं प्रयुक्ता न ददर्श, तनुमध्यानीत्यस्य श्लोकस्य पश्चा[र्धम्] इत्यादिकरण इति प्रदिष्टेकस्य दर्शयति—मध्यस्थीत्यादि। अस्यार्थः—कपीन्द्रः का[पि] मध्ये ह कुम्भानिददर्श। न विद्यते वर्णं यस्याः यासां तासां रमणकारिकाणामिवदं[श] सकलानां रमणीनां हारीणि हारयुक्तानि हारीणि मनोहराणि कुम्भानि समूहान् मध्यानि

ও একটী গুরু) পরে 'ন' গণ (একটী লঘু) ও তৎপরে একটী "গ" গণ (একটী গুরু) মাত্র থাকে তাহাকে 'চিত্রা' ছন্দ কহে।

৯। যে ছন্দের প্রতিপাদে প্রথম 'ত' গণ (অন্ত্যলঘু) পরে একটী 'য' গণ (আদিলঘু) মাত্র থাকে, তাহাকে তনুমধ্যা কহে।

न य

१०। 'शशिवदना' न्यौ ।

शशिवदनानां व्रजतरुणीनाम् ।
अधरसुधोर्मिं मधुरिपुरैच्छत् ॥

य य

११। द्विया 'सोमराजी' ।

। ऽ ऽ । ऽ ऽ

हरे सोमराजीसमा ते यशःश्रीः ।
जगन्मण्डलस्य भिनत्त्यन्धकारम् ॥

नाम मात्रु भवति इति दिक्। [illegible] तयोः [illegible] एव विमला इति [illegible]। [illegible] द्वितीयापूर्वस्य [illegible] प्रथमपादस्यैव [illegible] [illegible] गुरुत्वं स्वीकृतमिति।

१०। शशीति। नश्च यश्च न्यौ। यत्र नगणयगणौ भवतः सा शशिवदना नाम वृत्तं भवति। उदाहरणं शशिवदनेति—पूर्वार्धे—मधुरिपुः श्रीकृष्णः शशिवदनानां शशी चन्द्र इव वदनं यासां तासां व्रजतरुणीनां व्रजयुवतीनां अधरसुधोर्मिं अधरामृततरङ्गम् ऐच्छत् अभिलषितवान्। उपमारूपकालङ्कारः।

११। द्वियेति। यौ यौ यगणौ यत्र सा द्विया सोमराजी नाम वृत्तं भवति। यस्याः पादे आदिलघुवर्णत्रयात्मकं यगणद्वयं वर्तते सा सोमराजी वृत्तम्। उदाहरणम्—

১০। যে ছন্দের প্রতিপাদে প্রথম "ন" গণ ও পরে "য" গণ মাত্র থাকে, তাহাকে "শশিবদনা" ছন্দঃ কহে।

১১। যে ছন্দের প্রতিপাদে দুইটী মাত্র "য" গণ থাকে তাহাকে 'সোমরাজী' ছন্দঃ কহে।

म म

१२। 'विद्युल्लेखा' मो म।

[illegible] ([illegible]) ।

न न ग

१३। ननगि 'मधुमती'।

रविदुहितृतटे, वनकुसुमतति व्यथित मधुमती मधुमथनमुदम्॥

[illegible] । यथा —[illegible] । श्रीकृष्ण । [illegible] , [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] । [illegible]

१२। विद्युल्लेखेति। यस्या पादे [illegible] मगणौ [illegible] सा विद्युल्लेखा नाम वृत्तं भवति।

१३। ननगीति। नश्च नश्च गश्च तेषां समाहारः ननगं, तस्मिन् ननगि सति प्रतिपादं मधुमती नाम वृत्तं भवति। यस्याः पादे [illegible] नगणौ ततोऽपि [illegible] सा मधुमती नाम वृत्तं कथ्यते। उदाहरति—रवीत्यादि। अन्वयार्थ—रवि दुहिता यमुना। 'कालिन्दी सूर्यतनया यमुना शमनस्वसा' इत्यमरः। तस्यास्तटे मधुमती मधुयुक्ता। [illegible] वनकुसुमतति वनपुष्पराजि। मधु दैत्यविशेषं [illegible] मथ्नातीति मधुमथनः श्रीकृष्ण [illegible] व्यथित जनयति। [illegible] [illegible] [illegible]

[illegible]

১২। যে ছন্দের প্রতিপাদে দুইটী 'ম' গণ মাত্র থাকে তাহাকে বিদ্যুল্লেখা কহে।

১৩। যে ছন্দের প্রতিপাদে প্রথমতঃ দুইটী 'ন' গণ ও পরে একটী 'গ' গণ মাত্র থাকে তাহাকে মধুমতী কহে।